लघुग्रन्थरत्नप्रभावलिः—१८

श्रीरामकृष्णविरचितः

देवीपुष्पाञ्जलिः

(सव्याख्यः)

व्याख्याकारः सम्पादकश्च

हरदोई-जनपदे भीठाग्रामवास्तव्यः पण्डितप्रवरः

श्रीरामसहायदीक्षितः

सारस्वती सुषमा

भाद्रपदपूर्णिमा, सं० २०२३

प्रास्ताविकम्

जगतः पितरं शम्भुं जगतो मातरं शिवाम्।
तत्सुतं च गणाधीशं नत्वैतद्वर्णयामहे ॥
ब्रह्मा यस्यै हरिर्यस्यै रुद्रो यस्यै व्यधान्नमः।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥

विदितमस्तु श्रीमत्सु विद्वद्वरेण्येषु यच्छ्रीदेवीपुष्पाञ्जलिनाम स्तोत्रं सर्वस्तोत्राणां सारभूतमत एव सर्वोत्कृष्टं वरीवर्ति; यतो हि तत्र तत्र पद्येषु काव्येतिहासपुराणयोगादीनां लक्षणानि वर्तन्ते। इष्टदेवताप्राप्तिसाधनेषु त्रिष्वपि कर्मज्ञानोपासनाकाण्डेषु भक्त्यपरनाम्न्युपासनावैशिष्ट्यं च वर्तते। यथा प्रथमपद्ये शक्तिविशिष्टस्य शिवस्य चरणारविन्दे प्रणामः प्राचीनश्रुतिस्मृतिपुराणादिप्रतिपादितां शिष्टाचारपद्धतिं दर्शयति। तथा च श्रुतिः—

एष शिव इयं शक्तिरर्धेवं पुरुषस्त्वसौ।
यत्किञ्चिद् दृश्यते विप्र सर्वमेतद् द्वयात्मकम् ॥

द्वितीयपद्ये यजुर्वेदप्रतिपाद्यस्य सर्वपुराणप्रतिपाद्यस्य च श्रीगणेशस्य वन्दनम्, सर्वपुराणप्रसिद्धस्य विशेषतः श्रीनृसिंहपुराणप्रसिद्धस्य प्रह्लादरक्षणार्थं श्रीनृसिंहस्य वन्दनं च। तृतीयपद्ये श्रीहरेर्गुरोश्च चरणारविन्दयोर्नमस्कार इत्येवं पद्यत्रयेण भवानीशङ्करगणेशनृसिंहहरिगुर्वादिनमस्कारेण सर्वे प्रत्यूहा दूरीकृताः शिष्टाचारश्च शिष्यशिक्षार्थं दर्शितः। चतुर्थपद्ये शुम्भादीनामुत्पत्तिस्थितिसंहाराणां दर्शनेन ब्रह्मादयोऽपि शङ्किता उत्प्रेक्षालङ्कारं प्रकटयन्ति, तथा श्रीमद्देवीभागवतप्रामाण्यं श्रीमार्कण्डेयपुराणान्तर्गतश्रीदुर्गासप्तशतीप्रामाण्यं च विशेषरूपेण वर्तते।

पञ्चमपद्ये ब्रह्मविष्णुमहेश्वराणां धर्मैक्यमेकैव शक्तिरष्टादशभुजधारणेन बिभर्तीति नाविदितं विदुषाम्।

षष्ठपद्ये अष्टादशसु द्वीपेषु युगपत्पालनार्थमष्टादशभुजान् बिभर्तीति महद्वैशिष्ट्यं वर्तते।

सप्तमपद्ये सर्वेषां पर्वतानां मूलभूते शिरोमणिभूते च विन्ध्याचले निवासकर्तृत्वेन श्रीमद्भागवते श्रीमद्भगवता कृष्णचन्द्रेणाशस्ता योगमाया प्रतिपादिताऽभूत्।

अष्टमपद्ये "सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते। भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥" इति, "सर्वरूपमयी देवी सर्वं देवीमयं जगत्। अतोऽहं विश्वरूपां त्वां नमामि परमेश्वरीम् ॥" इत्यादिना च महालक्ष्मीरूपा प्रतिपादिता।

नवमपद्ये मधुकैटभयोर्वधकर्तृत्वेन श्रीदुर्गासप्तशत्याः स्मृतिं कारयति ।

दशमपद्ये धूम्राक्षस्य रक्तबीजस्य च वधकर्तृत्वेन शुम्भनिशुम्भयोश्च नाशनेन श्रीमार्कण्डेयपुराणान्तर्गतश्रीसप्तशत्याः स्मृतिं कारयति ।

एकादशपद्ये चण्डमुण्डयोर्विदारणेन श्रीदुर्गासप्तशत्याः पाठस्य स्मरणं कारयति, तथा सिंहद्वारा गजेन्द्राणां नाशनेन सिंहवाहिनीत्वं प्रतिपाद्यते ।

द्वादशपद्ये तु सर्वशक्तिमत्या श्रीभगवत्या केवलैकाकिन्या धनुष्मत्या सर्वदैत्यसंहारणेन सर्वदेवासुरे श्रीमत्या भगवत्याः कर्तुमकर्तुमन्यथाकर्तुं समर्थाया वैशिष्ट्यं द्योत्यते । यमकालङ्कारोऽपि शोभतेऽत्र ।

त्रयोदशपद्ये त्वसंख्यब्रह्माण्डाधीश्वरं शिवं दूतं कृत्वा प्रेषितवती शिवदूतीति नाम्ना प्रसिद्धाऽभूत्, तथा च दानवदूतदुरन्तगतिरभूत् समुद्र इवागाधाऽभूत् । अत्रापि यमकत्वं प्रतीयते ।

चतुर्दशपद्ये दैत्यशत्रुपुत्रादिषु शरणागतेषु वरदानमभयदानं च दत्त्वा "चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेषु" इति श्रीमार्कण्डेयान्तर्गतश्रीदुर्गासप्तशतीस्तोत्रं स्मारयति ।

पञ्चदशपद्ये वाद्यविद्यां गानविद्यां च प्रकाशयति ।

षोडशपद्ये अनुकरणशब्दानां प्रयोगे नाटकविद्याया नृत्यविद्यायाश्च रहस्यं ज्ञायते ।

सप्तदशपद्ये श्रीराजराजेश्वर्या भगवत्या असंख्यब्रह्माण्डाधीश्वर्या रूपं सौन्दर्यं लावण्यमनुपमं प्रतिपादितमस्ति ।

एवमेव सर्वेषु पद्येषु काव्येतिहासपुराणादीनां लक्षणानि विद्यन्ते ।

त्रयोविंशतितमे पद्ये श्रीदुर्गासप्तशतीप्रतिपादितसुरथसमाधिकृततपश्चर्या प्रसन्नता च प्रदर्शिता ।

अष्टाविंशतितमे पद्ये अष्टाङ्गयोगोपलक्षणत्वेन यमनियमादीन् प्रदर्शयति स्म ।

अस्य श्रीदेवीपुष्पाञ्जलिस्तवस्य कर्ता अविज्ञातदेशकालादेः श्रीपतिनाम्न आचार्यस्य पुत्रः श्रीरामकृष्णनामा बभूव । एतच्च एकोनत्रिंशत्त्रिंशत्तमाभ्यां पद्याभ्यां ज्ञायते ।

रामसहायदीक्षितः

स्थान—भीठा, पोस्ट—पण्डरवाकोट, जि० हरदोई, उ० प्र० ।

रामकृष्णविरचितः

देवीपुष्पाञ्जलिः

(सव्याख्यः)

भगवतीभगवत्पदपङ्कजं भ्रमरभूतसुरासुरसेवितम् ।
सुजनमानसहंसपरिष्कृतं कमलयाऽमलया निभृतं भजे ॥१॥

व्याख्या—[१]अमलया = निर्मलया, कमलया = शोभया, निभृतम् = नितराम्, नित्यम् = सर्वदा परिपूर्णमित्यर्थः। सुजनानाम् = सत्पुरुषाणाम्, मानसानि = मनांसि, तान्येव हंसास्तैः परिष्कृतमलङ्कृतमित्यर्थः। भ्रमरभूताः = मधुपतुल्याः, सुराः = इन्द्रादयः, असुराः = बाणादयस्तैः सेवितं पूजितमित्यर्थः । [२]भगवतीभगवतोः पदपङ्कजम् = चरणारविन्दम्, भजे = सेवे। श्रीरामकृष्णोऽहमिति शेषः, ग्रन्थान्ते रामकृष्णः कवीनामिति वर्णनात्।

१—अमलयेति 'मल धारणे' इति धातोः पचाद्यचि मलमिति रूपम् । 'मृजू शुद्धौ' इति धातोः (मृजेष्टिलोपश्च) इति कलप्रत्यये मलमिति रूपमिति वा । न मलं विद्यते यस्यां सा अमला, तया अमलया । कम् आकाशं सुखं धनं वा मलते दधाति सा कमला, तया निभृतं परिपूर्णम् । (स्वान्तं हृन्मानसं मनः) इत्यमरः । "उत्तरपदस्थो भूतशब्दस्तुल्यार्थवाचकः, पूर्वपदस्थो विद्यमाने" इति शब्दार्थचिन्तामणिः ।

२—भगं षडैश्वर्यं विद्यते यस्यासौ भगवान्, स्त्री चेद्भगवती । तथा चोक्तम्—

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥

अथवा भगं षट्पदार्थी जानातीति भगवान् । श्रीविष्णुपुराणे तथाह—

उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

ता उभा अपि वन्देऽहं विघ्नेशं कुलदैवतम् ।
नरो नागाननस्त्वेको नरः सिंहाननोऽपरः ॥२॥

व्याख्या—विघ्नेशं = विघ्नानामीशः = स्वामी श्रीगणेशः, 'गणानां त्वा' इति यजुर्वेदप्रतिपाद्यः प्रधानदेवः = सर्वदेवेषु प्रथमपूज्यस्तं तथोक्तम् । कुलदैवतम् = कुलस्य स्वीयबन्धुवर्गस्य दैवतमिष्टदेवं श्रीनृसिंहम् । उभौ = द्वावपि, तौ वेदपुराणादिषु प्रसिद्धौ, अहं वन्दे = प्रणमामि स्तुतिं करोमि । तयोरेको नरः सन् नागाननः = गजानन इत्यर्थः । अपरः = द्वितीयो नरः सन् सिंहाननः 'प्रह्लादरक्षणार्थं नृसिंह-रूपेणाविर्बभूवेत्यर्थः । तावुभावप्यहं वन्दे ॥२॥

१—नवधाभक्तिमध्ये स्मरणभक्तिप्रधानोऽत एव महाभागवतसंज्ञको हिरण्यकश्यपो-र्दैत्यस्य पुत्रः प्रह्लादनामा बभूव । स गर्भावस्थायामेव नारदेन मात्रे उपदिष्टं परमेश्वरप्राप्तिकरं वेदपुराणादिप्रतिपाद्यं कर्मोपासनाज्ञानकाण्डत्रयात्मकं जग्राह, त्रिष्वपि काण्डेषूपासनापरनाम्नीं झटित्येवेश्वरसाक्षात्कारिणीं भक्तिमेव परां मन्वानः स्मरणात्मिकामेव भक्तिं जग्राह, यतो हि नवधा भिद्यते सा । तथा चोक्तं श्रीमद्भागवतादिषु—

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥

अथासामधिकारिजनान् पृथक् पृथगाह—

श्रीविष्णोः श्रवणे परीक्षिदभवद्वैयासकिः कीर्तने
प्रह्लादः स्मरणे सदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने ।
अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽतिसख्येऽर्जुनः
सर्वस्वात्मनिवेदने बलिरभूत् पर्याप्तिरेषां परा ॥

इह विष्णोरिति नामग्रहणं श्रीगणेशदुर्गाशिवादीष्टदेवतानामुपलक्षणार्थम् । सर्वे तुल्या उपास्याश्च । तथा चोक्तम्—

हरौ हरे तीक्ष्णकरे गणेशे शक्तौ न भेदो जगदादिहर्तृषु ।
अधः पतन्त्येषु भिदां दधाना भाषन्त एवं गुरवो हि मामकाः ॥

हरिगुरुपदपद्मे हृद्यपद्मेऽनुरागा-
दधिगतपरभागे सन्निधायादरेण ।
तदनु चरिकरोमि प्रीतये भक्तिभाजां
भगवति पदपद्मे पद्यपुष्पाञ्जलिं ते ॥३॥

व्याख्या—हे भगवति ! = षडैश्वर्यवति ! राजाधिराजेश्वरि ! अखिलब्रह्माण्डाधीश्वरि ! अनुरागात् = स्नेहात्, अधिगतः = सम्प्राप्तः, [1]परभागः = गुणोत्कर्षो यस्मिन् तस्मिन् । हृद्यपद्मे = स्वकीयहृदयकमले, हरेः = विष्णोः, गुरोः = मन्त्रोपदेष्टुः, पदपद्मे = चरणकमले, संनिधाय = सम्यक्प्रकारेण चिरं ध्यात्वा, तदनु (भवानीशङ्करगणेशनृसिंहहरिगुर्वादीन् नत्वा = स्तुत्वा, ध्यात्वा) तत्पश्चाद् भक्तिभाजाम् = पूज्येष्वनुरागवताम्, जीवानां प्रीतये = प्रसादाय, ते = भवत्याः, पदपद्मे = चरणकमले, पद्यानि = श्लोका एव पुष्पाणि तेषामञ्जलिमिवाञ्जलिं भावनया, चरिकरोमि । यद्वा पद्यात्मकं पुष्पाञ्जलिनाम छन्दः [2]चरिकरोमि । पुनः पुनरतिशयेन वा करोमि समर्पयामि । पुष्पाञ्जलिछन्दसो लक्षणं यथा—

यस्यादौ नगणस्त्वेकः षडेव जगणास्ततः ।
अन्ते लघुगुरू यस्य स च पुष्पाञ्जलिः स्मृतः ॥ इति,

'अयि गिरिनन्दिनि' इत्यादौ तथा दर्शनात् ॥३॥

१—परभागः = गुणोत्कर्षः (श० चि०) ।

२—चरिकरोमि—इत्यत्र 'डुकृञ्' इत्यस्माद्धातोः (धातोरेकाचो हलादेः क्रियासमभिहारे यङ्) इति 'यङि कृते (यङोऽचि च) इति यङो लुकि, (प्रत्ययलोपे प्रत्ययलक्षणम्) इति प्रत्ययलक्षणमाश्रित्य (सनाद्यन्ता धातवः) इति धातुसंज्ञायां लटि (शेषात्कर्तरि परस्मैपदम्) इति मिपि समायाते (सन्यङोः) इति द्वित्वे (उरत्) इति रपरत्वे (हलादिः शेषः, कुहोश्चुः) इति चुत्वे (ऋतश्च) इति सूत्रेण विधीयमानेषु रुग्रिग्रीगागमेषु त्रिषु मध्ये रिगागमे कृते (तनादिकृञ्भ्य उः) इति उप्रत्यये (सार्वधातुकार्धधातुकयोः) इत्युभयत्रापि गुणे कृते यस्येत्संज्ञायां लोपे 'चरिकरोमि' इति निष्पन्नम् ।

केनैते रचिताः कुतो नु निहताः शुम्भादयो दुर्मदाः
केनैते बत पालिता इति हि तत्प्रश्ने किमाचक्ष्महे।
ब्रह्माद्या अपि शङ्किताः स्वविषये यस्याः प्रसादावधि
प्रीता सा महिषासुरप्रमथिनी भिद्यादवद्यानि मे ॥४॥
पातुं श्रीस्तु चतुर्भुजा किमु चतुर्बाहुं महौजोभुजान्
धत्तेऽष्टादशधा हि कारणगुणाः कार्ये गुणारम्भकाः।

व्याख्या—दुर्मदाः = दुष्टो मदो येषां ते, एते = बहवो भूताः, शुम्भादयः = शुम्भ आदिर्येषां ते, आदिपदेन निशुम्भचण्डमुण्डादयो ज्ञेयाः, केन = कर्त्रा, केन कारणेन वा रचिताः = कस्मै प्रयोजनायोत्पादिता इत्यर्थः। बत = विस्मये खेदे वा, केनैते संसारभयङ्कराः पालिताः। नु = वितर्के पक्षान्तरे वा, कुतः = कस्मात् कारणान्निहताः = उत्पाद्य परिपाल्य च नाशिताः। तदुक्तप्रश्ने = तद् ज्ञातु-मिच्छायाम्, हि = निश्चयेन, यस्याः = भगवत्याः, प्रसादावधि=प्रसादोऽवधिर्यस्य तत्प्रसन्नतापर्यन्तम्, स्वविषये = निजस्थाने, शङ्किता ब्रह्माद्याः = ब्रह्मविष्णुरुद्रा अपि किमुत्तरं आचक्ष्महे = वदाम इति (ब्रुवन्ति) इति शेषः। सा = ब्रह्मविष्णु-रुद्राणां कालकर्मस्थानाधिकारविधात्री भगवती, मह्यते पूज्यते इति महिषः, स चासाव-सुरश्च तं प्रमथितुं व्यालोडितुं शीलमस्याः सा तथोक्ता प्रीता = प्रसन्ना सती, मे = मम, [1]अवद्यानि = निन्दितानि कलङ्कानीति यावत्, भिद्याद् = विदारयेत्, नाशयेदित्यर्थः ॥४॥

व्याख्या—चतुर्भुजा श्रीः तु किमु चतुर्बाहुं पातुम् अष्टादशधा महौजोभुजान् धत्ते, हि यतः कारणगुणाः = कारणे हेतौ ये गुणाः सत्त्वादयस्ते कार्ये = प्रयोजने गुणारम्भकाः सृष्ट्यादिगुणोत्पादका भवन्ति। अत एव भगवती प्रत्येककार्ये चराचरे तत्तद्गुणवती ज्ञेया। कारणगुणानां कार्यगुणारम्भकत्वे दृष्टान्तमाह—सत्यमिति यदुक्तं तत् सत्यं भगवति ये गुणा रजोगुणसत्त्वगुणतमोगुणादयोऽष्टादशभुजा नानाविधानि रूपाणि च श्वेतरक्तकृष्णानि सन्ति, तानि सर्वाणि गुणभुजरूपादीनि ब्रह्मादिषु कार्य-

---

१—निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः।
कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः॥ (अ० ३।१।५४)

सत्यं दिक्पतिदन्तिसारभुजभृच्छम्भुः स्वयम्भूः स्वभूः
धर्मैक्यप्रतिपत्तये किमथवा पातुं दशाष्टौ दिशः ॥५॥
प्रीत्याष्टादशसम्मितेषु युगपद्देवेषु दातुं वरां-
स्त्रातुं वा भयतो बिभर्षि भगवत्यष्टादशैतान् भुजान् ।

रूपेण जातानीति न मृषा सत्यमेव, यथा—घटे मृत्तिकायां च मृत्तिकाधर्मैक्यं तथा भगवत्या धर्माणां सत्त्वादिरूपाणामैक्यमेकता तस्य प्रतिपत्तये = सिद्धये अष्टौ दिशः पातुं किमथवा = किं वा ऊर्ध्वाधो मिलित्वा दश दिशः पातुम् = रक्षितुं शम्भुः शिवोऽष्टौ भुजान् धत्ते, तदुक्तं मन्त्रमहोदधौ श्रीमहामृत्युञ्जयध्याने—

हस्ताम्भोजयुगस्थकुम्भयुगलादुद्धृत्य तोयं शिरः
सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ ।
अक्षस्रङ्मृगहस्तमम्बुजगतं मूर्धस्थचन्द्रस्रवत्
पीयूषोन्नततनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम् ॥

स्वयम्भूः = ब्रह्मा द्वौ भुजौ धत्ते तदुक्तम्—

ध्येयः पद्मासने ब्रह्मा साक्षसूत्रकमण्डलुः ।

स्वभूः = विष्णुरष्टौ भुजान् धत्ते, तदुक्तं भागवते नारायणवर्मणि—

हरिर्विदध्यान्मम सर्वरक्षां यस्याङ्घ्रिपद्मः पतगेन्द्रपृष्ठे ।
दरारिचर्मासिगदेषुचापपाशान् दधानोऽष्टगुणोऽष्टबाहुः ॥

कथंभूतः शम्भुः स्वयम्भूः स्वभूः दिक्पतिदन्तिसारभुजभृत् = दिक्पतिरिन्द्रस्तस्य दन्ती हस्ती गज ऐरावतस्तस्य सारम्[1] = बलं भुजेषु बिभर्ति = धारयति इति तथोक्तः ॥५॥

हे भगवति ! त्वं प्रीत्या = स्नेहेन युगपत् = एककालेनैवाष्टा[2]दशसम्मितेषु = अष्टादशसंख्याकेषु देवेषु[3] = तत्र तत्र द्वीपस्थितेषु वरान् = मनोरथान्

१—'सारो बले स्थिरांशे च न्याय्ये क्लीबं वीरे त्रिषु' (अ० ३।३।११७)

२—अष्टादशवाचकाः शब्दाः—द्वीपः, विद्या, पुराणम्, स्मृतिः, धान्यम् । (श०)

३—सप्तमहाद्वीपाः—१—जम्बूद्वीपः, २—प्लक्षद्वीपः, ३—शाल्मलद्वीपः, ४—कुशद्वीपः, ५—क्रौञ्चद्वीपः, ६—शाकद्वीपः, ७—पुष्करद्वीपः । जम्बूद्वीपस्योपद्वीपाः—१—स्वर्ण-

यद्यष्टादशधा भुजांस्तु बिभृतः कालीसरस्वत्युभे
लीलात्वैक्यमिहानयोः प्रथयितुं सा त्वं रमे रक्ष माम् ॥६॥

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्यशिरोधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।

दातुम् = वितरीतुं वा = अथवा भयतः (असुरेभ्य इति शेषः) त्रातुम् = रक्षितुम्, एतानष्टादशभुजान् = बाहून् बिभर्षि = धारयसि । यदि पक्षान्तरे कालीसरस्वत्यौ उभे अष्टादशभुजान् बिभृतः, तु (तत्तु) अनयोः कालीसरस्वत्योर्लीलात्वस्य = चरित्रताया ऐक्यम् = एकतां प्रथयितुं प्रख्यातुमेवेहास्मिन्नेव लोके त्वमष्टादशभुजान् बिभर्षि । अव्ययार्थो वैलक्षण्यं द्योतयति । त्वमेव सर्वेषामवताराणां मूलप्रकृतिरिति तात्पर्यार्थः । एवंविशेषणविशिष्टा सा त्वं भगवति रमे मां रक्ष ॥६॥

[1]"अयि' इत्यव्ययं कोमलामन्त्रणे, यथा लोके पुत्रा मातरं प्रति (अयिया) वदन्ति । गिरीन् = सुमेरुपर्वतादीन्, यद्वा पूज्यान् ब्रह्मादीन् नन्दयितुम् = हर्षयितुं शीलमस्याः सा गिरिनन्दिनी, तत्सम्बुद्धौ हे गिरिनन्दिनि ! नन्दिता समर्द्धिता मेदिनी = पृथ्वी यया सा तत्सम्बुद्धौ नन्दितमेदिनि ! विश्वं संसारं चतुर्दश-भुवनात्मकं विनोदयति = हर्षयति सा तत्सम्बुद्धौ विश्वविनोदिनि ! नन्दिना नन्दीश्वरेण वृषरूपेण नुते = नमस्कृते । नन्दनुते इति पाठे तु नन्देन = गोप-राजेन यशोदापतिना नुते । गिरिषु = सुमेरुपर्वतादिषु, वरः = श्रेष्ठः, तत्र भगवत्या अवतीर्णत्वाद् निवासाद्वा, तदुक्तम्—"नन्दगोपगृहे जाता यशोदागर्भसम्भवा । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥" विन्ध्याचलस्तस्य शिरोधौ शिरो धीयतेऽस्या-मिति शिरोधिरिति व्युत्पत्त्या पर्वतस्य किञ्चिच्छिरोभागं त्यक्त्वोर्ध्वभागे कन्दराया-मित्यर्थः । तत्र निवसति तच्छीला तत्सम्बुद्धौ गिरिवरविन्ध्यशिरोधिनिवासिनि ! विष्णुना सह विलासो विद्यते यस्याः सा तत्सम्बुद्धौ विष्णुविलासिनि ! श्रीमहालक्ष्मी-रूपेणेत्यर्थः । जिष्णुनाऽर्जुनेनेन्द्रेण वा नुता = स्तुता तत्सम्बुद्धौ जिष्णुनते ! हे भगवति =

प्रस्थः, २—चन्द्रगुल्मः, ३—प्रावर्तनः, ४—रमणकः, ५—मन्दरहरिणः, ६—पाञ्चजन्यः, ७—सिंहलः, ८—लङ्का, ९—रोमकपत्तनम्, १०—सिद्धपुरम्, ११—यमकोटिः ।

१—'अनुनये त्वयि' (अ. ३।५।१८)

भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूतकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥७॥
त्रिभुवनपोषिणि शङ्करतोषिणि कल्मषमोषिणि घोषरते
सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते ।

षडैश्वर्यसम्पन्ने ! शितिकण्ठस्य = नीलकण्ठस्य = शिवस्य कुटुम्बिनी तत्सम्बुद्धौ शितिकण्ठकुटुम्बिनि । भूरीणि कुटुम्बानि विद्यन्ते यस्याः सा तत्सम्बुद्धौ भूरिकुटुम्बिनि । भूतानि पञ्चतत्त्वात्मकानि सर्वप्राणिजातानि च कृतानि रचितानि यया सा तत्सम्बुद्धौ भूतकृते । अनन्तब्रह्माण्डरचयित्री त्वमेवासीत्यर्थः । रम्यः = रमणीयः, कपर्दः[1] = जटाजूटो यस्याः सा तत्सम्बुद्धौ रम्यकपर्दिनि ! महिषासुरस्य मर्दिनी = विनाशिनी तत्सम्बुद्धौ हे महिषासुरमर्दिनि ! शैलस्य = हिमालयस्य सुता पार्वती तत्सम्बुद्धौ शैलसुते ! एवंभूतैर्विशेषणैर्विशिष्टे हे भगवति ! त्वं जय जय सर्वोत्कर्षेण वर्तस्व वर्तस्व, 'नित्यवीप्सयोः' इति द्विरुक्तिः ॥७॥

त्रिभुवनपोषिणि = त्रयाणां भुवनानां समाहारः त्रिभुवनं पुष्णाति सा तत्सम्बुद्धौ, शङ्करतोषिणि = शं कल्याणं करोतीति शङ्करस्तं तोषयति सा तत्सम्बुद्धौ, [2]कल्मषमोषिणि = कल्मषम् = पापं मुष्णाति = चोरयति सा तत्सम्बुद्धौ, घोषरते = घोषे शब्दब्रह्मणि रता सा तत्सम्बुद्धौ, घोषे रतिर्यस्याः सा तत्सम्बुद्धौ इति वा । सुरवरवर्षिणि = सुरेभ्यो देवेभ्यो वरान् = मनोरथान् वर्षति = ददातीति तथा तत्सम्बुद्धौ, दुर्धरधर्षिणि = दुर्धरं तन्नामकं महिषासुरसेनापतिं धर्षयति सा तत्सम्बुद्धौ, दुर्मुखमर्षिणि = दुर्मुखं तन्नामकं महिषासुरसेनापतिं मर्षयति = नाशयति सा तत्सम्बुद्धौ, धातूनामनेकार्थत्वान्नशेरर्थः । हर्षरते = हर्षे = आनन्दे स्वकीयाऽद्वैतरूपे रता तत्सम्बुद्धौ, यद्वा हर्षे रतिर्यस्याः सा तत्सम्बुद्धौ । दनुजनिरोषिणि = कश्यपमहर्षेः पत्न्यां दनौ दक्षकन्यायां जनिरुत्पत्तिर्येषां ते दनुजनय-

१—'कपर्दोऽस्य जटाजूटः' (अ. १।१।३५)

२—अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम् । कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ॥ (अ. १।४।२३)

दनुजनिरोषिणि दुर्मदरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥८॥

अयि जगदम्ब कदम्बवनप्रियवासनिवासिनि वासरते
शिखरिशिरोमणितुङ्गहिमालयशृङ्गनिजालयमध्यगते ।
मधुमधुरे मधुकैटभभञ्जिनि कैटभगञ्जिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥९॥

स्तेषु रोषः = कोपोऽस्ति यस्याः सा तत्सम्बुद्धौ, दुर्मदरोषिणि = दुर्दुष्टो मदोऽहङ्कारो येषां ते दुर्मदास्तेषु रोषः क्रोधोऽस्ति यस्याः सा तत्सम्बुद्धौ, दुर्मदशोषिणि = तथा दुर्मदान् शोषयति तच्छीला तत्सम्बुद्धौ, दानवेषु दुष्टेषु दैत्येषु सर्वदा कोपं करोति नाशयति च तान् धर्मसंस्थापनायेत्यर्थः। सिन्धुसुते = सिन्धोः सुते लक्ष्मीरूपे ! इत्यर्थः। एवंभूतैर्विशेषणैर्विशिष्टे हे शैलसुते त्वं जय जयेति पूर्ववद्व्याख्येयम् ॥८॥

अयि = अनुनये सान्त्वने, हे जगदम्ब = जगताम् = चतुर्दशभुवनानामम्बा = माता तत्सम्बुद्धौ, कदम्बवनप्रियवासनिवासिनि = कदम्बानाम् = नीपवृक्षाणां वनं तत्र प्रियो वासो निवासस्थानं तत्र निवस्तुं शीलमस्याः सा तत्सम्बुद्धौ, वासरते = वासे स्वकीये सद्मनि सभागृहे वा रता न्यायकरणशीलत्वात् तत्सम्बुद्धौ। शिखरिणाम् = पर्वतानां मध्ये शिरोमणिः = श्रेष्ठो यस्तुङ्गो हिमालय उच्चो हिमगिरिस्तस्य शृङ्गे शिखरे यो निजालयस्तस्य मध्ये गता प्राप्ता तत्सम्बुद्धौ। [1]मधुमद्यमांसासवारिष्टादिकं [2]मधुरः प्रियो यस्याः सा तत्सम्बुद्धौ, मधुश्च कैटभश्च मधुकैटभौ तौ भङ्क्तुं शीलमस्याः सा तत्सम्बुद्धौ, कैटभं गञ्जति तच्छीला

१—मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जीवकोशे मधुद्रुमे ॥ (अ. टी. वि. ३।३।१०३)

२—मधुरस्तु प्रिये स्वादौ रसे च रसवत्यपि। मधुरा मथुरापुर्यां यष्टीमेदामधूलिषु ॥ मधुकुक्कुटिकायां च मिश्रेया शतपुष्पयोः ॥ (अ. टी. है. १।५।९); 'मधुरौ स्वादुशोभनौ' (अ. टी. व्या. ३।३।१९१); मधुरस्तु रसे विशे। मधुरं रसवत्स्वादुप्रियेषु मधुरोऽन्यवत् ॥ (अ. टी. वि. ३।३।१९१)

अयि निजहुङ्कृतिमात्रनिराकृतधूम्रविलोचनधूम्रशते
समरविशोषितशोणितबीजसमुद्भवशोणितबीजलते ।
शिव शिव शुम्भनिशुम्भमहाहवतर्पितभूतपिशाचपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१०॥

अयि शतखण्डविखण्डितरुण्डवितुण्डितशुण्डगजाधिपते
रिपुगजगण्डविदारणचण्डपराक्रमशौण्डमृगाधिपते ।

तत्सम्बुद्धौ, भगवति श्रीकृष्णचन्द्रे यो रासः श्रीमद्भागवते दशमस्कन्धे रासपञ्चाध्याय्यां रासक्रीडेति प्रसिद्धस्तत्र रता तत्सम्बुद्धौ, एवंभूतविशेषणैर्विशिष्टे हे महिषासुरमर्दिनि ! त्वं जय जयेति पूर्ववद् व्याख्येयम् ॥ ९ ॥

अयि ! निजेन = स्वकीयेन हुङ्कृतिमात्रेण निराकृतः = दूरीकृतो भस्मीकृतो धूम्रविलोचनः = धूम्राक्षाख्योऽसुर एव धूम्रशतम् = धूम्रसमूहो यया सा तत्सम्बुद्धौ । समरे = युद्धे विशोषिताः = विनाशिताः शोणितबीजसमुद्भवाः = रक्तबीजोत्पन्नाः शोणितबीजास्तादृशाः पुरुषास्तेषां लता[1] व्रततिः समूह इति यावद् यया सा तत्सम्बुद्धौ । शिव शिव इत्युच्चार्य शुम्भनिशुम्भयोर्महाहवे = महासङ्ग्रामे तर्पिताः = तृप्तीकृता भूताः पिशाचाः = देवयोनिविशेषास्तेषां पतयश्च यया सा तत्सम्बुद्धौ । एवं जय जय इत्यादि पूर्ववत् ॥१०॥

अयि ! शतखण्डेन विखण्डिताः = तिलशः खण्डिता इत्यर्थः । [2]रुण्डाः = कबन्धाः शिरोरहितदेहा येषां ते तथोक्ताः, तथा वितुण्डिताः = तोडिताः, [3]शुण्डाः = करिहस्ता येषां ते तथोक्ता गजाधिपतयो गजेन्द्राश्च यया सा (कर्मधारयः) तत्सम्बुद्धौ ।

१—'वल्ली तु व्रततिर्लता' (अ. २।४।९) 'लता ज्योतिष्मती दूर्वा शाखावल्लीप्रियङ्गुषु । स्पृक्कामाधव्योः कस्तूर्याम्' (अ. टी. है. २।४।९) ।

२—कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् (अ. २।८।११८) । 'कबन्धमुदके रुण्डे कबन्धो राहुरक्षसोः' (अ. टी. है. २।८।११८) ।

३—शुण्डा पानगृहे मता । अप्यम्बुहस्तिनी वेश्याहस्तिहस्तसुरासु च (अ० टी० मे० २।१०।४०)

निजभुजदण्डविपाटितचण्डनिपाटितमुण्डभटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥११॥
धनुरनुषङ्गरणक्षणसङ्गपरिस्फुरदङ्गनटत्कटके
कनकपिशङ्गपृषत्कनिषङ्गरसद्भटशृङ्गहतावटुके ।

रिपूणां गजास्तेषां [1]गण्डानां = कपोलानां कुम्भस्थलानां विदारणे यश्चण्डः = भयङ्करो पराक्रमस्तेन [2]शौण्डो विख्यातो मृगाधिपतिः सिंहो यस्याः सा तत्सम्बुद्धौ। निजेन = स्वकीयेन भुजदण्डेन विपाटितः = विदारितः चण्डस्तन्नामा दैत्यस्तथा निपाटितः = नितरां विदारितौ मुण्डश्चैतौ भटाधिपती यया सा तत्सम्बुद्धौ। एवं जय जय इति पूर्ववत् ॥११॥

धनुषः चापस्यानुषङ्गः सम्बन्धो धनुर्ग्रहणमित्यर्थः। एतादृशो यो रणक्षणो[3] युद्धकालस्तस्य सङ्गे = सङ्गमे परिस्फुरन्ति = सञ्ज्वलन्ति यानि अङ्गानि = गात्राणि तेषु नटन्ति = नृत्यन्ति [4]कटकानि = वलयानि = कङ्कणानि यस्या सा तत्सम्बुद्धौ। कनकेन = सुवर्णेन पिशङ्गाः = सुवर्णवर्णसदृशाः [5]पृषत्काः = बाणा यस्मिन्नेवंभूतो यो निषङ्गस्तूणीरो येषां ते तथोक्ता एवं भूता रसन्तः = शब्दं कुर्वन्तः = गर्जन्तो ये वटुशृङ्गाः[6] = देवीगणश्रेष्ठास्तैर्हताः = विनाशिता अवटुका = दैत्यदानवराक्षसपक्षीया यया सा तत्सम्बुद्धौ। कृतम् = विहितं युद्धकौशल्येन स्थापितं चतुरङ्गबलम् = हस्त्यश्वरथपदातिरूपं सैन्यम् = शत्रुसेना तस्य च्छिदिः = छेदनं तदर्थं

१—'गण्डौ कपोलौ' (अ० २।६।९०) ।

२—शौण्डो मत्ते च विख्याते पिप्पल्यां च भवेत् स्त्रियाम् (अ० टी० वि० मे० ३।१।२३)।

३—'निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः' (अ० ३।३।४७) ।

४—कटकस्त्वद्रिनितम्बे बाहुभूषणे (सेनायां राजधान्यां च) (अ० टी० है० २।३।५)।

५—'पृषत्कबाणविशिखा अजिह्मगखगाशुगाः। कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः' ॥ (अ० २।८।८६)

६—शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः कूर्चकशीर्षके ॥ स्त्री विषायां स्वर्णमीनभेदयोर्ऋषभौषधौ (अ० टी० मे० २।३।४) ।

कृतचतुरङ्गबलच्छिदिरङ्गघटद्बहुरङ्गरटद्वटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१२॥

अयि रणदुर्मदशत्रुवधोद्धरदुर्धरनिर्जरशक्तिभृते
चतुरविचारधुरीणमहाशयदूतकृतप्रमथाधिपते ।
दुरितदुरीहदुराशयदुर्मतिदानवदूतदुरन्तगते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१३॥

अयि शरणागतवैरिवधूगणवीरवराभयदायिकरे
त्रिभुवनमस्तकशूलविरोधिशिरोधिकृतामलशूलकरे ।

रङ्गे = रणभुवि घटन्तः चेष्टां युद्धव्यापारं कुर्वन्तो बहुरङ्गा[1] बहुरूपिणो रटन्तः = गर्जन्तो वटुका यस्याः सा तत्सम्बुद्धौ । एवं जय जयेति पूर्ववत् ॥१२॥

अयि ! रणे = युद्धे दुर्मदाः शत्रवस्तेषां वधे = मारणे उद्धरे = उद्धारकरणे तारणे चेत्यर्थः, दुर्धराः = दुराधर्षा या निर्जरशक्तयो ब्राह्म्यादयो महादेव्यस्ताभिर्भृता = युक्ता परिपूर्णेत्यर्थः, तत्सम्बुद्धौ । चतुरः = प्रवीणः, विचारे = सदसद्विवेचने, धुरीणः = धुरन्धरः, महाशयः = महामना उदारचित्त इत्यर्थः, एवंभूतो [2]दूतः कृतः प्रथमाधिपतिः = शिवो यया सा तत्सम्बुद्धौ । दुरितेन = पापेन दुष्टेहा = वाञ्छा येषां ते, दुराशयेन = दुष्टाभिप्रायेण दुर्मतयः = दुष्टबुद्धयो दानवास्ते च तेषां दूतेन सुग्रीवनाम्नाऽसुरेण दुरन्ता = दुष्प्राप्या गतिश्चेष्टा यस्याः सा तत्सम्बुद्धौ । एवं जय जयेति पूर्ववत् ॥१३॥

अयि ! शरणम् = अधीनताम्, आगताः = प्राप्ता वैरिणाम् = शत्रूणां वधूगणस्य = स्त्रीसमूहस्य, वीराः = शूराः पुत्रादयस्तेभ्यो वरान् = मनोरथान् अभयं च ददाति तच्छीलाः करा बाहवो यस्याः सा तत्सम्बुद्धौ । त्रिभुवनस्य = लोकत्रयस्य

१—'रङ्गो ना रागे नृत्यरणक्षितौ । अस्त्री त्रपुणि' (अ० टी० मे० २।९।१०६) ।
२—'स्यात् संदेशहरो दूतः' (अ० २।८।१६) ।

[1]धिमिधिमितामरदुन्दुभिनादमुहुर्मुखरीकृतदिङ्निकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१४॥

सुरललनाततथेयितथेयिकृताभिनयोदरनृत्यरते
कृतकुकुथः कुकुथो गडदादिकतालकुतूहलगानरते ।
धुधुकुटधुःकुटधिन्धिमितध्वनिधीरमृदङ्गनिनादरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१५॥

जयजयजप्यजये जयशब्दपरस्तुतितत्परविश्वनुते
झणझणझिंझिमिझंकृतनूपुरशिञ्जितमोहितभूतपते ।

स्वर्गमर्त्यपाताललोकस्य मस्तके शूला इव विरोधिनः शत्रवस्तेषां [2]शिरोधौ = ग्रीवायां कृतो मारणाय निःक्षिप्तोऽमलः = सूर्यवत् प्रकाशकः शूलः करे यस्याः सा तत्सम्बुद्धौ । धिमिधिमिता अमराणां दुन्दुभिनादास्तैर्मुहुः = पुनः पुनर्मुखरीकृतो दिङ्निकरः = दिशासमूहो यया सा तत्सम्बुद्धौ । एवं जय जयेति पूर्ववत् ॥१४॥

सुरललनाभिः = उर्वश्याद्यप्सरोभिस्ततथेयितथेयि इति शब्दैः कृतोऽभिनयो भावप्रदर्शनार्थं गात्रप्रक्षेपः =हस्तप्रक्षेप उदरे यस्मिन् तस्मिन् नृत्ये रता तत्सम्बुद्धौ । कृता ध्वनिताः कुकुथः कुकुथः गडदादिकाश्च तालाः = गानविषयकविरामध्वनि-विशेषाः, तेषां [3]कुतूहलेन = श्रवणचापल्येन गाने रता तत्सम्बुद्धौ । धुधुकुटधुः-कुटधिन्धिमितो यो ध्वनिः तेन धीरः = गम्भीरो मृदङ्गः = वाद्यविशेषस्तस्य निनादे = शब्दे रता संलग्ना सा तत्सम्बुद्धौ । एवं जय जयेति पूर्ववत् ॥१५॥

जयजयेति जप्यम् =जपनीयं येषां ते जयजयजप्या देवाः, तेषां जपो यस्याः सकाशादिति जयजयजप्यजया तत्सम्बुद्धौ । जयशब्दपरा = जयशब्दप्रधाना या

१—'दुरिदुमिताः' इति पाठे तु दुरिदुमिताः पश्चात्कृता अमरास्तेषां दुन्दुभिनादैः ।

२—'कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि' (अ० २।६।८८) ।

३—कुतूहलं रम्यदृष्टौ चापल्यं परिकीर्तितम् ।
कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ॥ (अ० १।७।३१)

नटितनटार्धनटीनटनायकनाटकनाटितनाट्यरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१६॥

अयि सुमनःसुमनःसुमनःसुमनःसुमनोरमकान्तियुते
श्रितरजनीरजनीरजनीरजनीरजनीकरवक्त्रवृते ।
सुनयनविभ्रमरभ्रमरभ्रमरभ्रमरभ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१७॥

स्तुतिः तस्यां तत्परम् = संल्लग्नं यद्विश्वम् = संसारो विष्णुर्वा तेन नुता स्तुता सा तत्सम्बुद्धौ । झणझणझिंझिमझंकृतेति नानाविधभूषणजनितनानाशब्दैर्युतेन नूपुराणां [1]शिञ्जितेन ध्वनिविशेषेण मोहितः = अनुरक्तो भूतपतिः शिवो यया सा तत्सम्बुद्धौ । प्राङ्नटितम् = नर्तितं यन्नटार्द्धं तत्र नर्तनमध्य एव नटीनटयोर्नायकस्य नटेश्वरस्य नाटकेन नाटकविधिना नाटितं यन्नाट्यं नर्तनवैशिष्ट्यं तत्र रता तत्सम्बुद्धौ । जय जयेति पूर्ववत ॥१६॥

अयि ! सुमनसः = देवाः, सुमनसः = महर्षयः, [2]सुमनसः = विद्वांसः, [3]सुमनांसि = पुष्पाणि तेभ्योऽपि सुमनोरमाऽत्यन्तरमणीया कान्तिः शोभा, तया युता तत्सम्बुद्धौ । श्रितः=धृतो [4]रजनीरजः=हरिद्रावद् रेणुर्येन तत्तादृशं नीरजं कमलम्, नीरजनी = कमलिनी, रजनीकरः चन्द्रः, तैस्तुल्यं वक्त्रम् = मुखं तेन वृता शोभिता तत्सम्बुद्धौ । सुनयनेषु = कमलनेत्रेषु विभ्रमम् = विलासं शोभां वा, राति=दधाति इति सुनयनविभ्रमरः, एवंभूतो यो [5]भ्रमरः = ललाटः, तत्र ये भ्रमराः = केशाः, तेषु भ्रमराः = मधुपा भ्रमराधिपतयश्च यस्याः सा तत्सम्बुद्धौ । जय जयेति पूर्ववत् ॥१७॥

१—अथ मर्मरः । स्वनिते वस्त्रपर्णानां भूषणानां तु शिञ्जितम् ।
निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि ॥ (अ० १।६।२४)

२—सुमनसो भून्नि पुष्पे जातौ तु भेदतः । विदुष्यपि यदा दृष्टस्तदा भेदेन शिष्यते ॥ (अ० टी० व्या० २।४।७२)

३—'सुमनाः पुष्पमालत्योः स्त्रियां ना धीरदेवयोः' (अ० टी० १।१।७); (अ० टी० मे० २।४।१७) ।

४—'रजनी नीलिनीरात्रिहरिद्राजतुकासु च' (अ० टी० मे० २।४।१५३) ।

५—'भ्रमरः कामुके भृङ्गे ललाटालकयोः' (इति मेदिनी) ।

महितमहाहवमल्लमतल्लिकवल्लितरल्लकभल्लरते
विरचितवल्लिचपल्लितमल्लिकसल्लिकभिल्लिकवर्गवृते ।
श्रितकृतफुल्लसमुल्लसितारुणतल्लजपल्लववल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१८॥
अविरलगण्डगलन्मदमेदुरमत्तमतङ्गजराजगते
त्रिभुवनभूषणभूतकलानिधिरूपपयोनिधिराजसुते ।

महितः पूजितो महा[1]हव[2]मल्लेषु = महायुद्धशूरेषु [3]मतल्लिकः = श्रेष्ठः शिव इत्यर्थः, तदर्थे वल्लितः = रचितो रल्लकः = सीमन्तः शिरःसिन्दूर-सरणिः, तद्युक्तो भल्लः = ललाटः, तत्र रता तत्सम्बुद्धौ । विरचिता केशमार्जन्यादिना निर्मलीकृता या वल्लिः = केशसंहतिः सा चपल्लिता = कवरीधम्मिल्लचूडादिभि-र्विशेषनिबद्धा तत्र मल्लिकसल्लिकानि = मालतीपुष्पाणि तद्वान् यो भिल्लिक-वर्गः तेन वृता, भिल्लिकवर्गः पर्वतीयः = जङ्गलीयो वा तत्सम्बुद्धौ । श्रितम् = सेवितं भ्रमरादिभिः, कृतफुल्लम् = सूर्यकिरणैर्विकसितम्, समुल्लसितम् = मकरन्देन = परागेण च शोभितम्, अरुणम् = ईषद्रक्तं यत् तल्लजम् = कमलं तस्य पल्लव-वल्ललितानि (अङ्गानि इति शेषः) यस्याः सा तत्सम्बुद्धौ । जय जयेति पूर्ववत् ॥१८॥

अयि अविरलम्[4] = विस्तृतो गण्डः = कपोलः, ततो गलन् = स्रवन् मदः = मदजलधारा, तेन मेदुराः[5] = अत्यन्तस्निग्धा मत्तमातङ्गजा मत्तगजेन्द्रास्तेषां राजा ऐरावतः तद्वद् गतिर्गमनं यस्याः सा तत्सम्बुद्धौ । त्रिभुवनभूषणभूतः[6] = त्रिलोका-

१—'आहवः संगरे यज्ञे' (अ० टी० मे० २।८।१०५) ।

२—'मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि' (अ० टी० मे० ३।५।२१) ।

३—यतम् = यतिम् अलति भूषयति इति व्युत्पत्त्या पृषोदरादित्वाद् अस्य लः इत्वं च (अल भूषणादौ) इत्यस्माद्धातोः 'ण्वुल्तृचौ' ३।१।१३३ इत्यनेन ण्वुल् ।

४—'पेलवं विरलं तनु' (अ० ३।१।६६) ।

५—'सान्द्रस्निग्धस्तु मेदुरः (अ० ३।१।३०) ।

६—'भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीबं त्रिषूचिते । प्राप्ते वित्ते समे सत्ये देव-योन्यन्तरेषु ना ॥ कुमारेऽपि' (अ० टी० मे० ३।३।७८) 'युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु' (अ० ३।३।७८); 'उत्तरपदस्थ एव भूतशब्दः समार्थः' इति शाब्दिकाः ।

अयि सुदतीजनलालसमानसमोहनमन्मथराजमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥१९॥
कमलदलामलकोमलकान्तिकलाकुलिताऽतुलभालतले
सकलविलासकलानिलयक्रमकेलिचलत्कलहंसकुले ।
अलिकुलसङ्कुलकुन्तलमण्डलमौलिमिलद्बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२०॥

भरणस्वरूपः कलानिधिः = चन्द्रः, तद्वद्रूपं यस्याः सा, सा चासौ पयोनिधिराजसुता पयोनिधिराजो महासागरस्तस्य सुतेव पुत्रीव महालक्ष्मीरूपा त्वमेवासीत्यर्थः, तत्सम्बुद्धौ । सुदतीजनानाम् = स्त्रीजनानां [1]लालसं मानसम् = मनोरथाऽतिशययुक्तं मनः, तस्य मोहनो मोहनकारी यो मन्मथराजः = महादेवस्तेन मता = अभिमता माननीया सा तत्सम्बुद्धौ । जय जयेति पूर्ववत् ॥१९॥

कमलदलवत् = पद्मपत्रवदमला = निर्मला कोमला = मृदुला कान्तिः = शोभा तया [2]कलया च चन्द्ररेखया इत्यर्थः, आकुलितः = व्याप्तः, अतुलः = विशालो भालतलः = ललाटपट्टो यस्याः सा तत्सम्बुद्धौ । सकलाः = सम्पूर्णा विलासाः = हावभावादयस्तेषां कला = चातुर्यं तस्या निलया तथा क्रमकेलिः = पादविक्षेपक्रीडा तद्वच्चलद् गच्छत् [3]कलहंसकुलम् = राजहंसकुलं यस्याः सा, सा चासौ तत्सम्बुद्धौ । इति कर्मधारयः । अलीनाम् = भ्रमराणां [4]कुलवत् = समूहवत्

१—'लालसौत्सुक्यतृष्णातिरेकयाञ्चासु च द्वयोः' (अ० टी० वि० मे० १।७।२८) ।

२—'कलं त्वजीर्णरेतसोः । अव्यक्तमधुरध्वाने कला स्यादंशशिल्पयोः ॥ कलने मूलरैवृद्धौ षोडशांशे विधोरपि' (अ० टी० है० १।३।१५) ।

३—'कलहंसस्तु कादम्बे राजहंसे नृपोत्तमे' (अ० टी० मे० २।५।२३) ।

४—'सजातीयगणैः कुलम्' (अ० २।६।४१); कुलं जनपदे गोत्रे सजातीयगणेऽपि च । भवने च तनौ क्लीबं कण्टकार्यौ वधौ कुली' (अ० टी० मे० २।७।१); 'कुल-संस्त्याने बन्धुषु च' इति भ्वादिगणी धातुः । संस्त्यानं = संघातः समूह इत्यर्थः, 'बन्धुशब्देन बन्धुताऽनुकूलो व्यापारो गृह्यते' इति सि० कौ० भट्टोजि० ।

करमुरलीरववीजितकूजितलज्जितकोकिलमञ्जुमते
मिलितमिलिन्दमनोहरगुञ्जितरञ्जितशैलनिकुञ्जगते ।
निजगणभूतवशाशबलाङ्गणरिङ्गणसम्भृतकेलितते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२१॥

सङ्कुलम् = घनीभूतं यत् [१]कुन्तलमण्डलम् = केशसमूहस्तद्वान् यो मौलिः = मस्तकं तेन मिलत् = सादृश्यं गच्छद् वकुलानाम् = केसरवृक्षाणाम् अलिकुलम् = भ्रमरसमूहो यस्याः सा तत्सम्बुद्धौ । एवं जय जयेति पूर्ववत् ॥२०॥

करस्थ[२]मुरल्या रवेण=हस्तगतवंशीनिनादेन [३]वीजितः=तिरस्कृतः कूजितः= शब्दं कुर्वाणो लज्जितः = सञ्जातलज्जः [४]कोकिलः = पिको यया सा मञ्जुः = मनोज्ञा मतिर्यस्याः सा चासौ (कर्मधारयः) तत्सम्बुद्धौ । मिलिताः = सङ्गता [५]मिलिन्दाः = भ्रमरास्तेषां मनोहरो गुञ्जितः=मनोहरध्वनिविशेषोऽव्यक्तशब्दस्तेन रञ्जितः = शोभितो यः शैलः = हिमालयो विन्ध्याचलो वा पर्वतस्तस्य निकुञ्जे[६] = लतादिपिहितोदरे गृहे गता=प्राप्ता तत्सम्बुद्धौ । निजस्य = स्वकीयस्य गणभूताः= अनुचरीभूता वशाः[७] = नार्यो देवाङ्गना इत्यर्थः, ताभिः शबलम्[८] = चित्रविचित्रं

आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम् ॥ (श० चि०)
जीवः प्रकृतितत्त्वं च दिक्कालाकाशमेव च ।
क्षित्यप्तेजोवायवश्च कुलमित्यभिधीयते ॥ (श० चि०)

१—'मण्डलं देशबिम्बयोः । भुजङ्गभेदे परिधौ शुनि द्वादशराजके । संघाते कुष्ठभेदे च' (अ० टी० १।३।६) ।

२—मुरली = वंशी 'मुर संवेष्टने' इति धातोः 'इगुपधत्वात् कः' । मुरेण संवेष्टनेन सम्यग् वलयाकारवेष्टनेन लीयते लीनं भवति सर्वं जगद्यस्यां सा मुरली सर्वजगन्मोहिनीत्यर्थः । (इति श० चि० म०)

३—विपूर्वक 'इज' गतिकुत्सनयोरिति धातोः क्तप्रत्यये कृते वीजित इति ।

४—'वनप्रियः परभृतः कोकिलः पिक इत्यपि' (अ० १।५।१९) ।

५—मिलन्ति पुष्पादिषु संगमं कुर्वन्तीति व्युत्पत्त्या मिल सङ्गमे धातोर्बाहुलकात् किन्दच् प्रत्ययः, मिलिन्दाः = भ्रमराः ।

६—'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' (अ० २।४।८) ।

७—'वशा स्त्री करणी च स्यात्' (अ० ३।३।२१७) ।

८—'चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे' (अ० १।६।१७) ।

कटितटपीतदुकूलविचित्रमयूखतिरस्कृतचण्डरुचे
प्रणतसुरासुरमौलिमणिस्फुरदंशुलसन्नखचन्द्ररुचे ।
जितकनकाचलमौलिमदोर्जितनिर्जरकुञ्जरकुम्भकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२२॥

विजितसहस्रकरैकसहस्रकरैकसहस्रकरैकनुते
कृतसुरतारकशङ्करतारकशङ्करतारकसूनुसुते ।

यदङ्गणम् (नं) = अजिरं तत्र यद्रिङ्गणम् = सञ्चरणं तेन सम्भृता = आरब्धा केलिततिः = क्रीडाबहुत्वं महती क्रीडा यया सा तत्सम्बुद्धौ । जय जयेति पूर्ववत् ॥२१॥

कटितटे = श्रोणिदेशे यत् पीतदुकूलम् = पीताम्बरं तस्य विचित्रा = नानाविधा ये [1]मयूखाः = किरणास्तैस्तिरस्कृतः = अनादृतः चण्डरुचिः = सूर्यो यया सा तत्सम्बुद्धौ । प्रणता = अवनता सुराश्च असुराश्च तेषां मौलिषु[2] = शिरस्सु किरीटेषु ये मणयः = पाषाणजातिरत्नानि तेषु स्फुरन्तः = सञ्ज्वलन्तो येंऽशवः = किरणास्तैर्लसन्त्यः = शोभमाना नखानां चन्द्र इव [3]रुचयः = दीप्तयो यस्याः सा तत्सम्बुद्धौ । जितः = विजितः कनकाचलस्य = स्वर्णपर्वतस्य सुमेरुनामकस्य मौलिः = मूर्धा यैस्तेऽत्युन्नता इत्यर्थः, मदेन = गण्डस्थलजलेन ऊर्जिताः = बलवन्तो ये निर्जरकुञ्जराः = देवगजा ऐरावतादयस्ते च ते (कर्मधारयः), तेषां कुम्भाविव = गजशिरोमांसपिण्डद्वयमिव कुचौ = स्तनौ यस्याः सा तत्सम्बुद्धौ । जय जयेति पूर्ववत् ॥२२॥

विजितः सहस्रकरः = सहस्रबाहुः कार्तवीर्यार्जुनो येन स परशुराम इत्यर्थः, एकसहस्रं कानि शिरांसि राति दधाति इति एकसहस्रकरः शेषोऽनन्तोऽखिलब्रह्माण्डधारक इत्यर्थः, एकसहस्रं कराः = किरणा यस्य स एकसहस्रकरः सूर्यः, एको मुख्यो

१—'किरणोस्रमयूखांशुगभस्तिघृणिघृष्टयः । भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियाम्' (अ० १।३।३३) ।

२—'मौलिः किरीटे धम्मिल्ले चूडायामनपुंसकम् । अशोकपादपे पुंसि' ।
(अ० टी० मे० ३।३।१९३)

३—'रुचिः स्त्री दीप्तिशोभायामभिष्वङ्गाभिलाषयोः' (अ० टी० मे० ३।३।२९) ।

सुरथसमाधिसमाधिसमाधिसमाधिसमाधिषु जातरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ।।२३।।

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे !
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।

येषां ते सूर्योपासकाः स च स च ते चेति द्वन्द्वः, तैर्नुता सा सम्बुद्धौ । कृतेन पुण्येनोपकारेण वा सुरान् भूसुरान् = इन्द्रादींश्च तारयति = मुक्तिं ददाति विपद्भ्यो निष्काशयतीति कृतसुरतारकः = श्रीरामचन्द्रो महादेवो वा तस्य शङ्करः = कल्याणकारी तारको मोक्षदाता षडक्षरात्मकः (ॐ रां रामाय नमः; ॐ नमः शिवाय) इति एकाक्षरात्मको वा (ॐ) इति मन्त्रेण शङ्करः शिवः तारकः = तारक इत्याख्यां जगाम, तस्य सूनुः = पुत्रः स्कन्दो गणेशो वा सुतो यस्या सा तत्सम्बुद्धौ । सुरथः = राजा, [1]समाधिः = वैश्यः, तयोः समाधिः = ध्यानम्, पुनः समाधिः = नियमाद्यङ्गीकारः, पुनः समाधिः = मौनता, पुनः समाधिरुचितनिश्चयः, तेषु जाता रतिर्यस्याः सा तत्सम्बुद्धौ । जय जयेति पूर्ववत् ।।२३।।

[2]करुणाया = दयाया [3]निलयः = आलयो यस्यां सा तत्सम्बुद्धौ । सुष्ठु शोभनं शिवम् = कल्याणं यस्यां सा तत्सम्बुद्धौ । कमलाया = लक्ष्म्या शोभाया निलयः = निवासस्थानं यस्यां सा तत्सम्बुद्धौ । हे कमले = लक्ष्मीरूपे हे शिवे = कल्याणमये, एवं विशेषणविशिष्टे हे भगवति, यः पुरुषस्तव भगवत्याः पदकमलम् = चरणारविन्दम् अनुदिनम् = प्रतिदिनं वरिवस्यति = =आवाहनादिषोडशोपचारैः

१—'समाधिर्ना समर्थने । ध्याने वैरस्य(ध्याननीवाक)नियमे काव्यस्य च गुणान्तरे'
(अ० टी० मे० ३।३।९८) ।

संविदागूः प्रतिज्ञानं नियमाऽऽश्रवसंश्रवाः । अङ्गीकाराऽभ्युपगमप्रतिश्रवसमाधयः ।।
(अ० १।५।५)

२ —'कारुण्यं करुणा घृणा । कृपा दयाऽनुकम्पा स्यादनुक्रोशोऽपि' (अ० १।७।१८) ।

३—गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ।
निशान्तवस्त्यसदनं भवनागारमन्दिरम् ।।
गृहाः पुंसि च भूम्न्येव निकायनिलयाऽऽलयाः । (अ० २।२।४-५)

तव पदमेव परं पदमस्त्वनुशीलयतो मम किन्न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२४॥
कनकलसत्कलशीकजलैरभिषिञ्चति तेऽङ्गणरङ्गभुवं
भजति स किं न शचीकुचकुम्भतटीपरिरम्भसुखानुभवम् ।

पूजयति स पुरुषः कमलानिलयः = धनाढ्यः कथं न भवेत्, अवश्यं भवेदित्यर्थः। हे भगवति ! तव पदम् = चरणारविन्दमेव केवलमनुशीलयतोऽहर्निशं ध्यानविषयीकुर्वतो मम भक्तस्य किं परं पदम् अशेषक्लेशनिर्वाणरूपम् = मोक्षाख्यं नास्तु, अवश्यमेवास्तु = भवतु इत्यर्थः । जय जयेति पूर्ववत् ॥२४॥

कनकवत् = सुवर्णवत् लसन्तः शोभमाना ये कलशीकाः[1] = कुम्भास्तेषां जलैस्तें = तव भगवत्या अङ्गणमजिरं तत्र या रङ्गभूः = नृत्यभूमिस्तां यः पुरुषः, अभिसिञ्चति = अभिषिक्तां करोति, स पुरुषः शच्या = इन्द्राण्या तत्तुल्याया अन्यस्याः स्त्रियाः स्वपत्न्या इत्यर्थः, एतेन भगवतीमन्दिरसेचनकर्तारोऽवश्यमेव पाणिगृहीतीं भार्यां प्राप्नुवन्तीत्यनुभवसिद्धम्। प्रकृतमनुसरामः—कुचावेव कुम्भौ तयोः स्तनकलशयोस्तस्यास्तद्देशस्य परिरम्भः = आलिङ्गनं तस्य सुखानुभवम् = सुखसाक्षात्कारं किन्न भजति अवश्यमेव भजतीत्यर्थः। हे मृडानि = हे भवानि ! तव चरणम् = पादारविन्दं शरणम् = रक्षितारं करवाणि, यतो हि सदा = सर्वदा मयि = शरणागते भक्ते शिवम् = कल्याणमभ्युदयनिःश्रेयस्करं धेहि धारय। तृतीयपादे उत्तरार्द्धे 'जितामर-

---

१—'कलशस्तु त्रिषु द्वयोः । घटः कुटनिपौ (अ० २।९।३१-३२) ।

कलशशब्दस्तालव्यान्तो दन्त्यान्तश्च । तालव्या अपि दन्त्याश्च शम्बशूकरपांशवः । कलशः शम्बलं चैव जिह्वायां रशना तथा ॥ केन = जलेन लसति 'लस श्लेषणक्रीडनयोः' पचाद्यच् कलसः । कलं श्यति = 'शो' तनूकरणे । (जातेरस्त्रीविषयादयोपधात्) इति ङीष् स्वार्थे कः = कलशीकः ।

तव चरणं शरणं करवाणि मृडानि सदा मयि धेहि शिवं
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२५॥

तव विमलेन्दुकलं वदनेन्दुमलं कलयन्ननुकूलयते
किमु पुरुहूतपुरीन्दुमुखीसुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवमानधनं भवतीकृपया किमु न क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२६॥

वाणि भवानि शिवम्' इति पाठे तु जिता तिरस्कृता अमराणां देवानां वाणी = सरस्वती यया सा तत्सम्बुद्धौ । तस्मिन् पक्षे शिवमिति पदं तु चरणस्य विशेषणं देयम् । जय जयेति पूर्ववत् ॥२५॥

हे मातः ! मम तु मतम् = मदीयस्त्वेष निश्चयः, यः पुरुषः, तव = भवत्या विमला = निर्मला इन्दुकला[1] = चन्द्रकला यस्मिन् तं वदनेन्दुं मुखचन्द्रमलं कलयन् नानाविधभूषणैः चन्दनकेसरकस्तूरिकाकर्पूरादिविलेपनैरप्यलंकुर्वन्, अनुकूलयते = प्रसादयति, असौ देवीप्रसादकः पुरुषः [2]पुरुहूतस्येन्द्रस्य पुरि = स्वर्गेऽमरावत्यां या इन्दुमुख्यः चन्द्रवदन्योऽत एव सुमुख्यः = सुन्दरमुखवत्योऽप्सरस इत्यर्थः । ताभिः किमु सम्भावनायां कथं वा विमुखीक्रियतेऽनङ्गीक्रियते, न कथमपि, किन्तु सादरं स्वीक्रियते, किञ्च भवतीकृपया = तव दयया शिवस्य मानम् = सम्मानं पूजेत्यर्थः, तदेव धनं किमु न क्रियते कथं न क्रियतेऽवश्यमेव शिवपूजाधनं प्रदास्यति । 'शिवमानधने' इति सप्तम्यन्तपाठे तु शिवस्य = महेश्वरस्य मानमेव धनं यस्याः सा तत्सम्बुद्धौ हे शिवमानधने भवतीकृपया किमु न क्रियते किं किं न क्रियते सर्वं क्रियत इत्यर्थः । जय जयेति पूर्ववत् ॥२६॥

१—'हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः' (अ० १।३।१३) ।

२—इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः ।
वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः ॥ (अ० १।१।४१)

अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयाऽसि यथाऽसि तथानुमिताऽसि रमे।
यदुचितमत्र भवत्युररीकुरुतादुरतापमपाकुरु मे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥२७॥

स्तुतिमितः स्तिमितः सुसमाधिना
नियमतो यमतोऽनुदिनं पठेत्।

अयि उमे = हे महेशानि मयि [1]दीने तव भक्ते या कृपा तयैव दीन[2]दयालुतया हेतुना त्वया भवितव्यं दीनदयालुस्वभावेन मयि दीने कृपायुक्ता भवेत्यर्थः। अयि रमे रमन्ते योगिनो यस्यां सर्वत्र रमणाद् वा रमा महामाया सा तत्सम्बुद्धौ। अतिकृपया जगतोऽखिलब्रह्माण्डस्य [3]जननी = उत्पादयित्री मता यथा भवितव्या तथाऽसि त्वमिति शेष इति, अनुमिताऽसि मयेति च शेषः। अत्र प्रार्थनायां = स्तोत्रे वा यदभ्यर्थनमुचितं योग्यं भवति = अस्ति, तत्त्वम् [4]उररीकुरुतात् = स्वीकुरुष्व (स्वीकृत्य च) मे = मम प्रार्थयमानस्य = शरणागतस्य उरुतापम् = महत्तापं तापत्रयमित्यर्थः, अपाकुरु = दूरीकुरु तापत्रयं विनाशय, मां त्वं सुखीकुरु (मां त्वमिति शेषः)। जय जयेति पूर्ववत् ॥२७॥

स्तुतिम् = पद्यपुष्पाञ्जलिनाम्नीं यो जनः, इतः = प्राप्तः, [5]सुसमाधिना = सुदृढ-ध्यानेन [6]स्तिमितः = क्लिन्नो ध्यानजनिताह्लादाश्रुपातार्द्रीभूतो निश्चलो वा

१—निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः। (अ० ३।१।४९)

२—स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः। (अ० ३।१।१५)

३—'जनयित्री प्रसूर्माता जननी' (अ० २।६।२९)।

४—ऊर्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम्। (अ० ३।४।२५४)

५—सम् + आङ् पूर्वात् 'डुधाञ् धारणपोषणयोः' इति धातोः (उपसर्गे घोः किः) इति धाञो किप्रत्यये समाधिरिति निष्पन्नम्।

६—'आर्द्रं सार्द्रं क्लिन्नं स्तिमितं समुन्नमुत्तं च' (अ० ३।१।१०५)।

परमया रमया स निषेव्यते
परिजनोऽरिजनोऽपि च तं भजेत् ॥२८॥

रमयति किल कर्षत्येषु चित्तं नराणा-
मवरज इव तस्माद्रामकृष्णः कवीनाम् ।
अकृतसुकृतगम्यं रम्यपद्यैकहर्म्यं
स्तवनमवनहेतोः प्रीतये विश्वमातुः ॥२९॥

नियमतः=नियमेन शौचादिपञ्चकेन, यमतः=यमेनाऽहिंसादिपञ्चकेन, अनुदिनम्= प्रतिदिनं पठेत् = व्यक्तवाण्याऽध्ययनं कुर्यात् स जनोऽनुदिनं यथोक्तविधिपाठ-महिम्ना परमया महत्या महाराजैश्वर्यवत्या रमया = लक्ष्म्या निषेव्यते लक्ष्मीवान् भवतीत्यर्थः। अरिजनः = शत्रुलोकोऽपि परिजनः = स्वजनः (भूत्वा) इति शेषः, तं जनम् = श्रीदेवीपुष्पाञ्जलिपाठकर्तारं भजेत् = सेवेत ॥२८॥

एष = रामकृष्णः कविः, अवनहेतोः=रक्षार्थं सुकृतगम्यम् = सुकृतेन पुण्येन गम्यम् = प्राप्यं रम्याणि =सुन्दराणि पद्यानि = छन्दांसि येषां ते रम्यपद्याः कवयः तेषामेकम्=मुख्यं [1]हर्म्यम्=विश्रामस्थानमेव भूतं स्तवनम्=स्तोत्रमकृत=अकार्षीत्, कस्मै प्रयोजनाय विश्वमातुः = भगवत्याः प्रीतये = प्रसादाय। तस्मात् = स्तोत्र-करणाद्धेतोरेष रामकृष्णः कविः किलेति निश्चयेन कवीनां शब्दशास्त्रनिष्णातानां नराणाम् = साधारणमनुष्याणां च चित्तम् = मनो[2]ऽवरज इव = कनिष्ठपुत्र इव, अनुज इव वा कर्षति, अन्यत्र गतं मनः स्तोत्रगतं करोति ततो रमयति, तत्रैव मनो रमत इत्यर्थः ॥२९॥

१—हरति मन इति व्युत्पत्त्या 'हृञ् हरणे' धातोः (अघ्न्यादयश्च) इत्युणादिसूत्रेण यग् मुट् च, गुणे हर्म्यम् । 'हर्म्यादि धनिनां वासः' (अ० २।२।९) ।

२—'जघन्यजे स्युः कनिष्ठयवीयोऽवरजाऽनुजाः' (अ० २।६।४३) ।

शरदिन्दुरम्यो बहुविन्दुगम्यो
मुहुर्वेद्यहृद्यो यतः साधुवन्द्यः ।
ततः श्रीपतेः सूनुनाऽकारि सत्-
सूनुना पद्यपुष्पाञ्जलिर्विश्वमातुः ॥३०॥
इदं स्तोत्रं पठेद्यस्तु नित्यं तद्गतमानसः ।
तस्य कार्याणि सिध्यन्ति नात्र कार्या विचारणा ॥३१॥

इति रामकृष्णकविविरचितः पद्यपुष्पाञ्जलिः समाप्तः ॥

ततः = तस्मात् कारणाच्छ्रीपतेः = श्रीपतिनाम्न आचार्यस्य [1]सूनुना = पुत्रेण रामकृष्णनामकेन विदुषा सत्सूनुना = साधुपुत्रेण सताम् = सज्जनानां मध्ये सूनुरिव = सूर्य इव श्रीपद्यपुष्पाञ्जलेः प्रकाशकत्वादिति वा विश्वमातुः = जगज्जनन्याः शरदिन्दुरम्यः = शरत्पूर्णिमाचन्द्र इव रम्यः = सुन्दरः बहुभिर्विन्दुभिः[2] = विद्वद्भिर्गम्योऽर्थतोऽवगन्तुं शक्यो मुहुः = अभीक्ष्णं वेद्येषु = ज्ञेयेषु = ज्ञातव्येषु विषयेष्वपि [3]हृद्यः = हृदयस्य प्रियो भगवत्याः सर्वोत्कृष्टत्वात् 'तेभ्यो माता गरीयसी' इति स्मरणात्, [4]साधुभिः = तल्लक्षणवद्भिः पुरुषैर्वन्द्यः = नमस्कार्यः । एवंभूतपुष्पाञ्जलिरकारि = व्यधायि, कृत इत्यर्थः ।

इदं देवीपद्यपुष्पाञ्जलिनामकस्तोत्रं नित्यम् = प्रतिदिनं तद्गतमानसः = तस्मिन् स्तोत्रे तस्यां भगवत्यां वा गतं प्राप्तं मानसं हृदयं यस्य सः, एवंभूतो यः = पुरुषः स्त्रीजनो वा पठेत् तस्य = पाठकर्तुः पुरुषस्य स्त्रीजनस्य वा कार्याणि बहुत्वात् सर्वाणि कार्याणि सिध्यन्ति, अत्र कार्याणां सिद्धौ विचारणा संदेहो न कर्तव्यः ॥३१॥

१—'सूनुः पुत्रेऽनुजेऽर्के ना' (अ० टी० मे० २।६।२७) ।

२—'ज्ञाता तु विदुरो विन्दुः' (अ० ३।१।३०) ।

३—अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् । (अ० ३।१।५३)

४—सत्यमेव व्रतं यस्य दया दीनेषु सर्वदा ।
कामक्रोधौ वशे यस्य स साधुः परिकीर्तितः ॥